अङ्क-२६
जुलाई-दिसम्बर २०१५

**वेदविद्या**
ISSN-2230-8962

# यज्ञपरम्परा नार्यश्च

**आचार्या सूर्या देवी चतुर्वेदा**

सम्पूर्णं ब्रह्माण्डं यस्मिन् केन्द्रबिन्दौ प्रतिष्ठितम्, तस्य केन्द्रबिन्दुः यज्ञः। वेदे उक्तम् -

**अयं यज्ञो विश्वस्य भुवनस्य नाभिः।**[१]

अर्थाद् एष यज्ञः सम्पूर्णस्य ब्रह्माण्डस्य नाभिभूतः। यज्ञो जगतः सर्वधारकः, संयोजकश्च वर्तते।

मन्त्रेण स्पष्टं यद् यज्ञः संसारस्य महानुपकारको वर्तते। जडचेतनात्मकेभ्यः सर्वेभ्यो यज्ञः आरोग्यं, बलं, पराक्रमश्च प्रददाति।

यज्ञेनारोग्यता बलधनादिसम्पत्तीनामैश्वर्यं सम्प्राप्यते, अतः वेदे यज्ञः सुखसाधकः प्रोच्यते -

**यज्ञो देवानां प्रत्येति सुम्नम्।**[२]

अर्थात् यज्ञो देवेभ्यः ज्ञानादिप्रकाशकेभ्यः सुखप्रदानाय सुष्ठु साधनम्।

तथा च - **आयुर्यज्ञेन कल्पताम्।**[३]

अर्थात् यज्ञः आयुवर्धकः।

**अयं वै यज्ञो यं पवते।**[४]

अर्थात् यज्ञः प्रदूषणमपकृत्य सर्वान् पुनाति पदार्थान्।

इत्थमधिगतं यद् यज्ञः सर्वप्रकारकान् दोषान्, मलिनताश्च व्यपाकुर्वन् पालयति, पोषयति। समेषां पालकानां, पोषकाणामेतेषां यज्ञानां विधिविधानं श्रौतस्मृतिब्राह्मणादिषु ग्रन्थेषु विहितम्। यज्ञस्य महत्त्वं ख्यापयन् शतपथब्राह्मणे उक्तम् -

**यज्ञो वै श्रेष्ठतमं कर्म।**[५]

अर्थात् एष यज्ञः श्रेष्ठः = उत्तमो वर्तते, यज्ञः श्रेष्ठतमाय कर्मणे च विद्यते।

श्रेष्ठतममुच्यमानानां यज्ञानां त्रयो भेदाः वर्तन्ते।

**१. पाकयज्ञाः।**

---

[१] अथर्व. ९/१०/१४
[२] ऋ. १/१०७/१
[३] यजु. ९/२१
[४] ऐ. ब्रा. ५/३३
[५] शत. ब्रा. १/७/१/७

२. **हविर्यज्ञाः।**

३. **सोमयज्ञाः।**

**पाकयज्ञाः स्मृतियज्ञाः वर्तन्ते, तस्मात्ते स्मार्तयज्ञा अपि कथ्यन्ते।** स्मार्तयज्ञाः तेषां यज्ञानां सञ्ज्ञा येषां विधिविधानं स्मृतिग्रन्थेषु विहितम्। **स्मार्तनाम्ना** ज्ञायमानेषु यज्ञेषु **पाकयज्ञान्तर्गताः - प्रातर्होमः, सायंहोमः, स्थालीपाकः, बलिवैश्वदेवयज्ञः, पितृयज्ञः, अष्टका** एवं **पशुयज्ञश्च** एते सप्त यज्ञाः सन्ति।

हविर्यज्ञाः, सोमयज्ञाश्चोभावेव श्रौतयज्ञाः, ब्राह्मणोक्ताश्चाभिधीयन्ते।

**हविर्यज्ञान्तर्गताः** - अग्न्याधानम्, अग्निहोत्रम्, दर्शम्, पौर्णमासः, नवसस्येष्टिः, चातुर्मास्यम् एवं पशुबन्धश्चैते सप्त यज्ञाः परिगणिताः।

**सोमयज्ञान्तर्गताः** - अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः एवम् अप्तोर्यामश्चैते सप्त यज्ञाः सङ्गृहीताः।

**एषु समस्तेषु यज्ञेषु ब्रह्मयज्ञः** = सन्ध्योपासनं, पठनपाठनम्, **देवयज्ञः** = अग्निहोत्रकरणम्, **पितृयज्ञः** = मातृपितृभूतादिजनानां सेवां शुश्रूषाञ्च करणम्, **बलिवैश्वदेवयज्ञः** = गौः, श्वा आदिपशूनां रक्षणं, भोज्यादिपदार्थप्रदानम्, **अतिथियज्ञः** = धार्मिकाणां विदुषाञ्चादीनां सत्कारकरणमेतानि नित्यकरणीयानि यज्ञकर्माणि वर्तन्ते। नित्यमनुष्ठानेनैते ५ पञ्च महायज्ञाः उच्यन्ते। यथा -

**पञ्च वै एते महायज्ञाः सतति प्रतायन्ते।**[1]

अर्थात् एते पञ्च महायज्ञाः नित्यमनुष्ठेयाः भवन्ति।

यज्ञानुष्ठानस्यैषा यज्ञपरम्परा अतिप्राचीना। प्राचीनकालादेव कर्मकाण्डस्यैतेषां पञ्चानां यज्ञानां करणे कारणे च नराः नार्यश्चोभावेव शास्त्रैः पूर्णा अधिकृताः सन्ति। यज्ञं कुर्वन्, कारयंश्च पुरुषः यथा **'यज्ञियः'** उच्यते, तथैव यज्ञं कुर्वन्तीः, कार्यन्तीश्च नार्यः **'यज्ञियाः'** उच्यन्ते।

यज्ञं कुर्वतां कारयतां च "यज्ञियः, यज्ञिया" सम्बोधनं व्याकरणविशेषज्ञैः प्रदत्तम्। आसां सञ्ज्ञानां कारकं पाणिनीयं सूत्रं वर्तते -

**यज्ञर्त्विग्भ्यां घखञौ।**[2]

सूत्रस्यार्थः- यज्ञ, ऋत्विक् प्रातिपदिकाभ्यां तदर्हति अर्थे यथासङ्ख्यं घखञ्प्रत्ययौ भवतः।

अर्हति पदस्यार्थः योग्योऽस्ति। इत्थं सूत्रनिष्पत्त्या **यज्ञमर्हति यः या वा, सः सा वा यज्ञियः यज्ञिया, ऋत्विजमर्हति आर्त्विजीनः, आर्त्विजीना** कथ्यन्ते।

"यज्ञिया, यज्ञियः" शब्दयोः अयमर्थः - यज्ञयोग्याः नार्यः, पुरुषाश्च।

---

[1] तै. आ. २/१०

[2] पा. ५/१/७०

**वेदे नारीयज्ञाधिकारः**

पुरुषाणां समं नार्यः अपि यज्ञस्य करणे, कारणे च सन्ति योग्याः, अत एव वेदेषु नारीणां विशेषणं "यज्ञिया" पदं वर्तते। मन्त्रोऽस्ति -

**शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक्सादयामि।**
**यत्काम इदमभिषिञ्चामि वोऽहमिन्द्रो मरुत्वान्त्स ददातु तन्मे॥**[1]

अर्थात् **इमाः** = एताः, **शुद्धाः** = बाह्यरूपेण शरीरादिभिः परिशुद्धाः, **पूताः** = आन्तरिकरूपेण विचारैः पवित्राः, **यज्ञियाः** = यज्ञस्य करणे कारणे च योग्याः, **योषितः** = नार्यः, **ब्रह्मणाम्** = ज्ञानीनाम्, **हस्तेषुः** = करेषु, **पृथक्** = भेदेन, **प्र सादयामि** = स्थापयामि, **यत्कामः अहम्** = यां कामनावन्तोऽहं पिता, **वः** = हे ब्रह्मज्ञानिनः ! युष्मभ्यम्, **इदम्** = एतज्जलम्, **अभिषिञ्चामि** = सिषेचे, **मरुत्वान्** = मरणधर्माणां रक्षकः, सः, **इन्द्रः** = परमैश्वर्ययुक्तः सः प्रभुः, **तत्** = तां कामनाम्, **मे** = मम, **ददातु** = पूरयेत्।

मन्त्रे विवाहविषयो प्रतिपादितः विद्यते। विवाहे च नारीणां का योग्यता स्यादेतदर्थं वेदे यथा 'शुद्धाः, पूताः' नारीणां विशेषणानि प्रदत्तानि, तथैव 'यज्ञियाः' विशेषणमपि प्रदत्तम्। येन स्पष्टं यन्नारीणां यज्ञकरणस्य, कारणस्य च पूर्णाधिकारः।

**व्याकरणे नारीयज्ञाधिकारः**

नार्यः यज्ञस्य करणे कारणे च पुमान्निवाधिकृताः, एतदर्थं महर्षिपाणिनिना यदा नारीणां पत्नीसञ्ज्ञा कृता, तदा तस्याः सञ्ज्ञायाः हेतुः 'यज्ञसंयोगः' संस्थापितः। तत्सूत्रम् -

**पत्युर्नो यज्ञसंयोगे।**[2]

सूत्रार्थः- पति प्रातिपदिकात् यज्ञसंयोगे गम्यमाने स्त्रीलिङ्गापेक्षायां ङीप् प्रत्ययो भवति, एवं नकारश्चान्तादेशः प्रसूयते। सूत्रस्योदाहरणम् - **यजमानस्य पत्नी।**

पाणिनिमहर्षेः सूत्रस्य तात्पर्यं यद् यजमानस्य स्त्री पत्नीसञ्ज्ञया तदैव सम्बोधयितुं शक्यते, यदा स्त्रीपुरुषौ उभौ मिलित्वा यज्ञं कुरुतः चेत् अन्यच्च तस्य स्त्रियः पत्नीसञ्ज्ञा तदैव सम्भवति, यदा सा पतिसदृशं यज्ञमनुतिष्ठति, अनुष्ठापयति च।

वेदेषु, वैदिकग्रन्थेषु च **"पत्नी, पत्नीवन्तः"** शब्दाः विद्यन्ते। ते शब्दाः सुस्पष्टं कुर्वन्ति नारीणां यज्ञाधिकारम्। यथा -

**पत्नीवन्तो नमस्यं नमस्यन्।**[3]

---

[1] अथर्व. ६/१२२/५

[2] पा. ४/१/३३

[3] ऋ. १/७२/५

अस्मिन् मन्त्रे आगतस्य **'पत्नीवन्तः'** शब्दस्यार्थो वर्तते, यज्ञं कुर्वतीभिः कारयत्रीभिः, ज्ञात्रीभिः ज्ञापयत्रीभिः युक्ताः सहिताः, **नमस्यम्** = वन्दनीयं परमेश्वरम्, **नमस्यन्** = सत्कुर्वन्ती सत्कुर्वन्तश्च, **तन्वः कृण्वत** = उत्तमं शरीरं प्राप्नुवन्ति।

नारीणां यज्ञानुष्ठानकरणे कारणे च पूर्णोऽधिकारो विद्यते, अत एव यस्मिन् यज्ञे नार्यः न स्युः, स यज्ञोऽपूर्णः उक्तः। तथा हि -

**अयज्ञो वा एष योऽपत्नीकः।**[1]

अर्थात् स यज्ञः यज्ञो न भवति यः पत्नीरहितः क्रियते। तात्पर्यमिदं नारीं विहाय यज्ञः पूर्णतां न याति च।

नार्यः सर्वप्रकारैः ज्ञानविज्ञानैः सार्धं यज्ञस्य सर्वाणि विधिविधानान्यपि जानन्ति, अत एव वेदे नार्यः **"चतुष्कपर्दा"** नाम्ना कथिताः। मन्त्रोऽस्ति -

**चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते।**
**तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम्॥**[2]

अर्थात् **चतुष्कपर्दा** = ऋग्यजुः सामथर्वरूपं शब्दज्ञानज्ञानिनी, **युवतिः** = युवावस्थां प्राप्ता, सुपेशाः = रूपिणी, **घृतप्रतीका** = घृतसदृशं प्रदीप्तयित्री, **वयुनानि वस्ते** = ज्ञानविज्ञानं संरक्षति, **तस्याम्** = एवम्भूतायां नार्यां, **सुपर्णा** = सुपालकाः, सुगन्तारः, **वृषणा** = सेचकाः, **नि षेदतुः** = स्थिराः भवन्ति, यत्र = यस्यां, **देवाः** = विद्वांसः, **भागधेयम्** = ज्ञानभागं, **दधिरे** = धारयन्ति, गृह्णन्ति।

मन्त्रेऽस्मिन् **'चतुष्कपर्दा'** शब्दो वर्तते, यो नारीणां ज्ञानानां, गुणानां च प्रदर्शकः। येन केनापि चत्वारो वेदाः पठिताः भवन्ति, यश्च चतुरो वेदान् जानाति, सः कर्मकाण्डविषयमपि सुष्ठु प्रजानाति। नार्यश्च चतुष्कपर्दाः, वेदवेदज्ञास्सन्ति, तस्माद्धेतोः ताः अपि यज्ञस्य विधिविधान्यवगच्छन्ति।

**ब्राह्मणेषु नारीयज्ञाधिकारः**

वेदविहिता नारीणां यज्ञकरणस्य कारणस्य च या परम्परा सा आ प्राचीनकालमक्षुण्णा वर्तते। नार्यः यज्ञकर्मणोऽधिकारिण्यः सन्ति, अत एव तैत्तिरीयब्राह्मणे प्रोक्तम् -

**इडा वै मानवी यज्ञानूकाशिन्यासीत्।**[3]

वचनस्यार्थः - मनोः पुत्री मानवी इडा यज्ञस्य प्रकाशिका अभूत्।

तैत्तिरीयब्राह्मणस्यास्मिन् वचने मनोः पुत्री **यज्ञानूकाशिनी**विशेषणेन विशेषिता येन स्पष्टं यन्नार्यः यज्ञं प्राचीनकालादेव कुर्वन्ति, कारयन्ति च।

---

[1] तै. ब्रा. २/२/२/६
[2] ऋ. १०/११४/३
[3] तै. ब्रा. १/१/४/४

सायणाचार्येणास्मिन् तैत्तिरीयब्राह्मणवचने आगतस्य "यज्ञानूकाशिनी" शब्दस्यार्थो "यज्ञ तत्त्वप्रकाशनसमर्था" कृतः, यस्यार्थः प्रकाशने, ज्ञापने सामर्थ्यवती नारी।

**दर्शनेषु नारीयज्ञाधिकारः**

दर्शनग्रन्थेष्वपि नारीणां यज्ञाधिकारं संव्यक्तयन्नुक्तम् -

**जातिं तु बादरायणोऽविशेषात्तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्।**[१]

वचनेऽस्मिन्नाचार्यो बादरायणः स्वर्गस्येच्छा स्त्रीपुरुषयोः एकसमं भवतीत्यभिलक्ष्य **जातिम्** = मनुष्यमात्रमधिकृतं मन्यते, जातेः सामान्यत्वात्।

जैमिनेः वचनस्य तात्पर्यमिदं यत् **'स्वर्गकामो यजेत'** आदिविधिवाक्येषु जातिशब्देन मनुष्यजातिमात्रस्य ग्रहणं भवति, अतः नारीणामपि यज्ञाधिकारो वर्तते, न चानधिकारः।

**इतिहासग्रन्थेषु नारीयज्ञाधिकारः**

अस्माकं ये रामायणमित्यादयः ऐतिहासिकाः ग्रन्थाः विद्यन्ते, तेषु ग्रन्थेष्वपि साधुतरं प्रतिपादितं यन्नार्यः स्वतन्त्ररूपेण यज्ञं कुर्वन्ति स्म, कारयन्ति स्म च । माताकौसल्यादीनां नारीणां यज्ञकरणस्य कारणस्य चानेकानि प्रसङ्गान्युपलभन्ते। यथा -

**सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा।**
**अग्निं जुहोति स्म तदा मन्त्रवत् कृतमङ्गला॥**[२]

अर्थात् वेदविदा, धृतव्रता, प्रसन्नचित्ता, कौशेयवस्त्रधारिणी माता कौसल्या मङ्गलं प्रतिपादयन्ती, मन्त्रपूर्वकमग्निहोत्रं करोति स्म।

एतत् माता कौशल्यायाः यज्ञसम्पादनस्य प्रकरणं तत्कालस्य वर्तते, यस्मिन् समये रामो वनगमनाय आज्ञां ग्रहीतुं मातरं समागमत्।

अशोकवाटिकायां वसन्ती सीतापि यज्ञं करोति स्म। तथा हि -

**वैदेही शोकसन्तप्ता हुताशनमुपागमत्।**[३]

अर्थात शोकसन्तप्ता विदेहपुत्री सीता अग्निहोत्रमकरोत्।

**महर्षि दयानन्दमते नारीयज्ञाधिकारः**

युगप्रवर्तक**महर्षिदयानन्देना**पि सम्मानपूर्वकमुद्घोषपूर्वकं च स्वग्रन्थेषु नार्यः यज्ञस्यानुष्ठात्र्यः प्रतिपादिताः। **ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ**[४], अस्मिन् मन्त्रे आगतस्य होत्रापदस्यार्थं कुर्वता महर्षिदयानन्देन नारीणां यज्ञाधिकारे लिखितम् -

[१] मीमां. ६/१/८
[२] रामा. अयो. २०/१५
[३] रामा. सुन्दर. ५३/२५
[४] यजु. ६/२५

**होत्रा = हवनकर्मानुष्ठात्र्यः।**[१]

महर्षेः अनेनार्थेन सुस्पष्टं यन्नारिजातिः कन्यादिशब्दैरुच्यमाना कर्मकाण्डस्याग्निहोत्रमादि-कर्मणामनुष्ठात्री भवति।

**मध्यकाले नारीणां यज्ञेष्वनधिकारः**

मध्यकाले यज्ञकरणस्य कारणस्य च परम्परा उच्छिन्ना जाता, तदा नारीणां यज्ञाधिकारं नाशयन्ति स्वार्थसाधकानि वाक्यानि निर्मितानि, मनुस्मृत्यादिधर्मग्रन्थेषु च प्रक्षिप्तानि। उदाहरणरूपेण श्लोकोऽस्ति -

**न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः।**
**होता स्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा॥**[२]

प्रक्षिप्तस्यास्य वचनस्यार्थोऽस्ति -

कन्याः, युवतयः, अल्पशिक्षिताः, मूर्खाः, संस्काररहिताश्च जनाः अग्निहोत्रस्य होता न स्युः।

श्लोकेऽस्मिन् **'कन्या, युवतिः'** पदैः उच्यमानानां नारीणां यज्ञाधिकारान्निर्मूलयितुमल्पविद्यावद्भिः मूर्खैः, असंस्कृतज्ञैः जनैः साकं **'कन्या, युवतिः'** नामभ्यां नार्योऽपि विनैव हेतुना निपातिताः।

नारीणां यज्ञानुष्ठानस्य निषेधकः एष श्लोकः प्रक्षिप्त एव ज्ञेयः, यतोहि वेदेषु वेदानुकूलग्रन्थेषु च कुत्रापि नारीणां यज्ञकरणस्य कारणस्य च निषेधो नैव विहितः, वेदेषु तु नार्यः यज्ञाधिकारिण्य एव नह्युक्ताः यज्ञस्य केतवः प्रोक्ताः। मन्त्रोऽस्ति -

**माता देवानामदितेरनीकं यज्ञस्य केतुः।**[३]

अर्थाद्देवानामुत्पादयित्री मातृभूता नारी, अदितेः = रक्षणाय, सेनासमानी वर्तते, यज्ञस्य ध्वजरूपा चास्ति।

इत्थं सिद्धं यद् यज्ञकरणस्य कारणस्य च परम्परायां नारीणां पूर्णोऽधिकारो विद्यते। वेदैः, ब्राह्मणैः, दर्शनैः, इतिहासादिभिः ग्रन्थैश्च सुप्रमाणितं यन्नार्यः यज्ञकरणे, कारणे च पुंसान्निवाधिकृताः विद्यन्ते।

**आचार्या सूर्या देवी चतुर्वेदा**
प्राचार्या,
पाणिनि कन्या महाविद्यालय, वाराणसी - १०

---

[१] दया. भा. यजु. ६/२५
[२] मनु. ११/३६
[३] ऋ. १/११३/१९